# पाठ-१४
# अमृतस्य पन्थाः

**सारान्शः**

सूर्यः सर्वेषां रूपम् अस्ति, सूर्यः एव आश्रयभूतः अपि अस्ति।शरीरं रथसदृशः,शरीरस्य स्वामी आत्मा अस्ति। बुद्धिः सारथि,इन्द्रियाणि(अश्वाः) शरीरम् इतः ततः आकर्षन्ति,मनः प्रग्रहमेव ।

मनसः नियंत्रितं शरीरं सम्यक् रूपेण चलति। यः मनुष्यः आत्मानं सत्येन तपसा च पश्यति, सः एव आत्मानं ज्ञातुं शक्यते।

यत् पुत्रः पितुः अनुकूलः स्यात्, पितरम् अनुचरेत्, पुत्रः मातुः इच्छायाः आदरं कुर्यात् सा यथा वाञ्छति तथा कुर्यात् । पत्नीपत्योः मध्ये कलहः मा भवतु अतः वेदमन्त्रः आदिशति यत् पत्नी पत्ये मधुरां शान्तिमयीं च वाणीं वदतु ।भ्राता भ्रातरं प्रति द्वेषं न कुर्यात् । सहोदरं प्रति द्रोहं न करोतु। उभौ प्रेमपूर्वकं वसताम्।भगिनीं प्रति द्वेष न कुर्यात्। स्वसा अन्यां स्वसारं प्रति द्रोहं न कुर्यात्।वेदमन्त्रः आदिशति यत् यूयं सर्वे जनाः समानगतिकाः समानमतवन्तः समानकर्मकराः परस्परं मधुरया वाण्या-भाषया-गिरा व्यवहारं कुरुत। यूयं प्रेमपूर्वकं वसत ।

**मुख्य बिन्दवः**

- यजुर्वेदे चत्वारिंशत् अध्यायाः सन्ति । प्रस्तुतपाठे प्रथमौ द्वौ मन्त्रौ यजुर्वेदस्य स्तः (यजुर्वेदः अध्यायः -3 मन्त्रः 47), (यजुर्वेदः अध्यायः - 23 मन्त्रः 48 ) ।
- तृतीयः मन्त्रः सामवेदस्य अस्तिः । सामवेदे मन्त्राणां गायनं भवति । अतः ऋग्वेदस्य अनेके मन्त्राः सामवेदे अपि सन्ति । उत्तरार्चिकम् अध्याय 9 खण्ड 1 मन्त्रः 1।चतुर्थः, पंचमः, षष्ठः, एते मन्त्राः उपनिषद्भ्यः गृहीताः।
  प्रश्नोपनिषद् 1.8
  कठोपनिषद् 1.3.3
  श्वेताश्वतरोपनिषद् 1. 15
- उपनिषत्सु आत्मनः परमात्मनः विषये चिन्तनं वर्तते । एते ग्रंथाः वेदान्तदर्शनस्य आधारभूताः सन्ति ।
- पाठस्य सप्तमः अष्टमः च मन्त्रौ अथर्ववेदस्य स्तः । यत्र परिवारस्य सुखरीतिः उक्ता ।
  अथर्ववेदः 3.30.4
  अथर्ववेदः 3.30.3

अथर्ववेदे ब्रह्मज्ञानस्य लौकिकव्यवहारस्य च अनेके विषयाः वर्णिताः सन्ति ।

**अवगच्छामः**

संस्कृतस्य वाङ्मयम् अति समृद्धम् अस्ति वेदाः चत्वारः सन्ति- ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च । वेदांगानि षट् सन्ति- शिक्षा, व्याकरणम्, छन्दः, कल्पः, निरुक्तं ज्योतिषं च प्रमुखाः एकादश उपनिषदः सन्ति- ईश-केन-कठ-प्रश्न-मुण्डक मांडूक्य-ऐतरेय-तैत्तिरीय-छान्दोग्य, बृहदारण्यक-श्वेताश्वतराः। रामायणं महाभारतं च महाकाव्ये स्तः ।

**आवश्यकोऽयं ज्ञानम्**

**अमृतस्य पन्था इति किम्?**

यथा यथा बालकाः बालिकाः च वयसा वृद्धिं प्राप्नुवन्ति तथा तथा स्वपर्यावरणस्य विषये तेषां तासां च जागरूकता प्रवर्धते। अतः विविधान् प्रश्नान् पृच्छन्ति । एतेषां प्रश्नानाम् उत्तराणि ज्येष्ठाः श्रेष्ठाः च जनाः स्वबुद्ध्यनुसारं वदन्ति । अस्माकं पूर्वजैः ऋषिभिः एतादृशानां बहूनां प्रश्नानाम् उत्तराणि उक्तानि । तानि अस्माकं समृद्धे साहित्ये उपलभ्यन्ते । वेदाः उपनिषदः च संस्कृतवाङ्मयस्य मूर्धन्याः ग्रंथाः। तत्र जिज्ञासानां शमनपूर्वकं समुचितरूपेण जीवनयापनस्य मार्गः प्रदर्शितः। सः मार्गः एव अमृतस्य पन्थाः अस्ति ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

**पर्यायवाची-** एक एव शब्दस्य स्थाने येषां भिन्न भिन्न समानार्थी पदानां प्रयोगः भवति ते एव पर्यायवाचिनः।


- **समुद्रः**- सागरः, उदधिः, वारिधिः, नीरनिधिः, जलधिः।
- **सूर्यः**- दिवाकरः, दिनमणिः, सहस्ररश्मिः, सहस्रकरः, सहस्रकिरणः, सहस्रदीधितिः, सहस्रमरीचिः, सहस्रधाम, सहस्रपाद, सहस्रांशुः, सहस्रार्चिः, तिग्मदीधितिः ।
- भ्रातृ, जामातृ देवृ शब्दानां रूपाणि **पितृवत्** भवन्ति।

**शब्दार्थाः**

1. सूर्यसमं = सूर्य के समान
2. सहस्ररश्मिः = हजार किरणों वाला
3. शं = कल्याण
4. सारथिम् = रथ चलाने वाले को
5. सर्पिः = घी
6. स्रोतःसु = स्रोतों में
7. संमनाः = अच्छे मन वाले

8. द्विक्षत् = द्वेष करे
9. सम्यंचः = समान व्रत वाले

**योग्यतां वर्धयत**




**पाठ संप्रेष्यः**

- ब्रह्म, द्यौः, इन्द्र, गौः, सृष्टौ विशिष्टाः सन्ति ।
- सोमः मनुष्याणां कल्याणं करोति ।
- शरीरं रथम् अस्ति आत्मा तस्य स्वामी रथी अस्ति ।
- आत्मा आत्मनि एव वर्तते बहिः न विद्यते ।
- श्रोत्रादीनाम् इन्द्रियाणां चेतनत्वम् आत्मनः एव भवति अस्माभिः परिवारे परस्परं प्रेमभावनया स्थातव्यम् ।
- द्वयोः मध्ये तुलनायाम् ईयसुन् प्रत्ययः, एकस्य बहुभिः तुलनायां इष्ठन् प्रत्ययः प्रयुज्यते ।
- 'विद्' धातोः रूपाणि आत्मनेपदे भवन्ति ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- मूल मन्त्राणां सस्वर अभ्यासं कुरुत।